कामरूपे कामतरुः काश्यामुक्तस्तथादिमः ।
काञ्चीपुरे पुरः प्रोक्तः श्रीफलोऽक्षयपुण्यदः ।
तेऽपि तीर्थविशेषाः स्युस्तीर्थेष्वपि सदातुलाः ॥
देव्युवाच ।
एतस्मिन्नेव काले तु शम्भुरागत्य वै सखि ।
ब्रह्मणा विष्णुना पत्रैः पूजितः श्रीफलैरभूत् ॥
ततः सर्व्वे यथास्थानं जग्मुर्नारायणादयः ।
कथितोऽयं मया सख्यौ विल्वद्वक्षस्तरूत्तमः ॥
अयं वा संप्रोक्तः शिवतरुकथापुण्यनिचयः
पवित्रः श्रोतव्यः श्रवणरमणीयः खलु सताम् ।
शिवे विष्णौ भेदापहरण उदारः सुमनसां
सुसेव्यः संपाद्यः प्रभवति शिवस्यापि निकटः ॥”
इति च बृहद्धर्म्मपुराणे विल्ववृक्षमाहात्म्यम्
११ अध्यायः ॥*॥ तन्त्रमते तस्योत्पत्तिर्यथा,—
देव्युवाच ।
“कथं सा विष्णुवनिता विल्ववृक्षो बभूव ह ।
ज्योतीरूपं महेशं प्रार्थिता ब्रह्मादिभिः सदा ॥
तत्र मेऽनुग्रहादाणो सर्व्वेषां प्रियतां गता ।
विष्णोरतिप्रिया नित्यं साभूत् सरस्वती सदा ॥
तादृक् प्रीतिर्न लक्ष्म्याश्च जायते केशवस्य च ।
इतिचिन्तापरा लक्ष्मीर्ययौ श्रीशैलमन्दिरम् ॥
प्राप्य मल्लिङ्गमेकान्तं तपस्तेपेऽतिदारुणम् ।
तथापि यदि नैवाभूत् कृपा मे परमेश्वरि ॥
तदा सा वृक्षरूपेण स्थिता लिङ्गप्रिया सती ।
पत्रैः पुष्पैः फलैः स्वीयैः पूजयामास सन्ततम् ॥
कोटिवर्षं महादेवि ततो मेऽनुग्रहोऽभवत् ।
तेनैवानुग्रहेणैव विष्णोर्वक्षःस्थिताभवत् ॥
सदैव परमेशानि विप्रलब्धा सदैव हि ।
अतस्तु कारणाद्देवि तद्रूपेण हरिप्रिया ॥
सदैव पूजयेन्मां सा मद्भक्ता सातुला शिवे ।
अतस्तं वृक्षमाश्रित्य तिष्ठामि च दिवानिशम् ॥
सर्व्वतीर्थमयो देवि सर्व्वदेवमयः सदा ।
श्रीवृक्षः परमेशानि अतएव न संशयः ॥*॥
तत्फलैस्तत्प्रसूनैर्व्वा तत्पत्रैः प्रपूजयेत् ।
तत्काष्ठचन्दनैर्व्वापि स मे भक्तः स मे प्रियः ॥
तत्काष्ठचन्दनं भाले यो धारयति सम्भ्रमात् ।
तत्तत् शिवमुद्रा सा नर्मदेवी मुदान्विता ॥
अतस्तच्चन्दनं देवि न धारयति कश्चन ।
तत्पत्रं तत्प्रसूनं वा कदापि धारयेन्नहि ॥
विल्वमूले महेशानि प्राणांस्त्यजति यो नरः ।
रुद्रदेहो भवेन् सत्यं पापकोटियुतोऽपि सन् ॥”
इति योगिनीतन्त्रे पूर्व्वखण्डे ५ पटलः ॥*॥
अपि च ।
“विल्ववृक्षं तथा देवि भगवान् शङ्करः स्वयम् ।
विल्ववृक्षतले स्थित्वा यदि प्राणांस्त्यजेत् सुधीः ॥
तत्क्षणाम्मोक्षमाप्नोति किन्तस्य तीर्थकोटिभिः ।
यत्र ब्रह्मादयो देवास्तिष्ठन्ति शक्तिहेतवे ॥
विल्ववृक्षतले स्थानं यदि विष्ठादिपूरितम् ।
तदेव शाङ्करं क्षेत्रं सर्व्वतीर्थमयं सदा ॥
सर्व्वपीठमयं तत्तु सर्व्वदेवमयं सदा ।
न त्यजेत् शाङ्करं क्षेत्रं न च गङ्गां त्यजेत्
प्रिये ॥

समीपे स च पार्व्वत्रि विल्ववृक्षो यदि प्रिये ।
काशीपुरसमं तत्तु तत्र प्राणान् त्यजेद्यदि ।
किन्तस्य कोटितीर्थेन काशीवासेन किं प्रिये ॥”
इति पुरश्चरणरसोल्लासे १० पटलः ॥*॥
तद्दानविधिर्यथा,—
“पत्रं वा यदि वा पुष्पं फलं नेष्टमधोमुखम् ।
यथोत्पन्नं तथा देयं विल्वपत्राण्यधोमुखम् ॥”
इति मातृकातन्त्रे ५५ पटलः ॥
श्रीशिव उवाच ।
“शृणु देवि प्रवक्ष्यामि रहस्यं त्रिजटात्मकम् ।
पत्रं ब्रह्ममयं देवि अद्भुतं वरवर्णिनि ॥
श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः ।
विष्णुप्रीतिकरश्चैव मम प्रीतिकरः सदा ॥
ब्रह्मविष्णुशिवाः पत्रे वृन्तञ्च शक्तिरूपिणी ।
वृन्तमूले तु वज्रं स्यात् पत्रे ब्रह्मपदं प्रिये ॥
त्रिजटापत्रकेनैकेन हरं वा हरिमर्च्चयेत् ।
कैवल्यं तस्य तेनैव शक्तिपूजा विशेषतः ॥
पत्रं पुष्पं फलं तोयं नैवेद्यं धूपदीपकम् ।
दत्त्वा यद्यत् फलं प्राप्तं तस्मात् कोटिगुणं
भवेत् ॥
सर्व्वैरर्च्चनतो देवि त्रिजटामेकमर्पणम् ।
कैवल्यदो हरिश्चैव दास्येऽहं त्वां स्वरूपताम् ॥
त्वयि कैवल्यदं ज्ञानं धर्म्मकामार्थदं प्रिये ।
वज्रहीनमिदं देवि प्राप्नुयाद्वाञ्छितं फलम् ॥
सवज्रं म्रियते नूनं वज्राघातेन पार्व्वति ।
तस्माच्च साधकेन्द्रेण वज्रहीनं प्रदापयेत् ॥”*॥
विल्वपत्रशाखाग्रहणानन्तरगमनफलम् । यथा,
“शाखां गृहीत्वा यो गच्छेत् उर्व्वशिद्धिमवा-
प्नुयात् ।
ऊर्द्धं सुदर्शनं रक्षेदधः पाशुपतस्तथा ।
पुरो माहेश्वरी रक्षेत् पृष्ठे च शूलधारिणी ।
दक्षपार्श्वे च श्रीनाथो वामपार्श्वे प्रजापतिः ।
चन्द्रसूर्य्यौ धृतौ छत्रमहं पादौ करौ सदा ॥”
इति ज्ञानभैरवतन्त्रे शिवपार्व्वतीसंवादे ६
पटलः । (अस्य गुणाः यथा,—
“बालं विल्वफलं ग्राहि दीपनम्पाचनङ्कटु ।
कषायोष्णं लघु स्निग्धं तिक्तं वातकफापहम् ॥
पक्वं गुरु त्रिदोषं स्याद्दुर्ज्जरं पूतिमारुतम् ।
विदाहि विष्टम्भकरं मधुरं वह्निमान्द्यकृत् ॥
फलेषु परिपक्वं यद्गुणवत्तदुदाहृतम् ।
विल्वादन्यत्र विज्ञेयमामन्तद्धि गुणाधिकम् ॥
द्राक्षाविल्वशिवादीनां फलं शुष्कं गुणाधि-
कम् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
वि(बि)ल्वपेषिका, स्त्री, (विल्वस्य पेषिका ।)
शुष्कविल्वखण्डम् । बेलशुँठा इति भाषा ।
यथा,—
“कफवातामशूलघ्नी ग्राहिणी विल्वपेषिका ।”
इति राजनिर्घण्टः ॥
वि(बि)ल्वा, स्त्री, (विल्व+टाप् ।) हिङ्गुपत्री ।
इति राजनिर्घण्टः ॥ (गुणादयोऽस्या हिङ्गु-
पत्रीशब्दे ज्ञातव्याः ॥)

विवक्षा, स्त्री, वक्तुमिच्छा । सनन्तवचधातोरप्र-
त्ययेन निष्पन्नमिदम् । यथा । विवक्षावशात्
कारकाणि भवन्ति । इति व्याकरणटीका ॥
शक्तिः । यथा,—
“प्रकृत्यर्थेऽपि खल्वेतद्दृष्टिद्वयस्य विशेषणम् ।
संख्यया तुल्यनीतित्वादविवक्षा प्रपद्यते ॥”
एत्येकादशीतत्त्वम् ॥
विवक्षितः, त्रि, वक्तुमिष्टः । सनन्तवचधातोः क्तप्र-
त्ययेन निष्पन्नमिदम् । शब्दार्थः । यथा । उपा-
देयगतायाः संख्याया विवक्षितत्वं युक्तम् । अनु-
पादेयगता संख्या न विवक्षिता । इति माधवा-
चार्य्यः । इत्येकादशीतत्त्वम् ॥
विवदमानः, त्रि, विवादकर्त्ता । विपूर्व्ववदधातोः
शानप्रत्ययेन निष्पन्नः ॥
विवधः, पुं, (विविधो वधो हननं गमनं वा यत्र ।)
पर्य्याहारः । स तु धान्यतण्डुलादिः । मार्गः ।
पन्थाः । इत्यमरभरतौ ॥ ब्रीह्यादेः पर्य्या-
हरणम् । इति स्वामी ॥ उपरितो बहुशिक्य-
स्कन्धवाह्यकाष्ठम् । बाँक् इति ख्यातम् । इति
भानुदीक्षितः ॥ भारः । इति मुकुटधृतविश्वः ॥
विवधिकः, पुं, (विवधेन हरतीति । विवध+
“विभाषा विवधवीवधात् ।” ४ । ४ । १७ । इति
ष्ठन् ।) वैवधिकः । इत्यमरटीका सारसुन्दरी ॥
विवरं, क्ली, (विवृणोतीति । वि+वृ+पचाद्यच् ।)
छिद्रम् । इत्यमरः ॥ (यथा, रघुः ।११।१८।
“यश्चकार विवरं शिलाघने
ताड़कोरसि स रामसायकः ।
अप्रविष्टविषयस्य रक्षसां
द्वारतामगमदन्तकस्य तत् ॥”)
दोषः । इति मेदिनी ॥ (यथा, महाभारते ।
१ । १४१ । १७ ।
“एकाग्रः स्यादविवृतो नित्यं विवरदर्शकः ।
राजन्यं सपत्नेषु नित्योद्विग्नः समाचरेत् ॥”
अवकाशः । यथा, भागवते । ५ । १० । १२ ।
“विशेषबुद्धेर्विवरं मनाक् च
पश्याम यन्न व्यवहारतोऽन्यत् ॥”)
विवरणं, क्ली, (वि+वृ+ल्युट् ।) व्याख्या ।
इति हलायुधः ॥
विवरनालिका, स्त्री, (विवरयुक्तं नालं यस्याः ।)
वेणुः । इति त्रिकाण्डशेषः ॥
विवर्णः, पुं, (विरुद्धो वर्णः ।) नीचः । इत्य-
मरः ।२।१०।१६॥ (यथा, मार्कण्डेये । ४९।१० ।
“भैक्षचर्य्या विवर्णेषु जघन्या वृत्तिरिष्यते ॥”
त्रि, विकृतो वर्णो यस्य ।) मलिनः ॥ (यथा,
रामायणे । २ । २६ । ८ ।
“विवर्णवदनं दृष्ट्वा तं प्रस्विन्नममर्षणम् ।
आह दुःखाभिसन्तप्ता किमिदानीमिदं प्रभो ॥”)
विवर्त्तः, पुं, (वि+वृत्+घञ् ।) समुदायः । अप-
वर्त्तनम् । नृत्यम् । इति विश्वः ॥ (प्रतिपत्तः ॥
यथा, नैषधे । ३ । ६४ ।
“ईशाणिमैश्वर्य्यविवर्त्तमध्ये
लोकेशलोकेशयलोकमध्ये ॥”